Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

॥ श्री महाकाल महेश्वराय ॥

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

Center for Shaiva Studies, Pondicherry Collection

c Domain. Digitization by Agam Nigam. Funding Tattva Heritage Founda

॥ श्री शिव सहस्रनाम स्तोत्रम् ॥

श्री रामकृष्ण मठम्
मैलापुरम्, मद्रपुरी

Center for Shaiva Studies, Pondicherry Collection

Published by :
© The President,
Sri Ramakrishna Math,
Mylapore, Madras 600 004.

All Rights Reserved
First Impression
I-3M 3C-6-90

ISBN 81-7120-249-7

Printed in India at
Sri Ramakrishna Math Printing Press,
Mylapore, Madras 600 004.

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

ध्यानम्

वन्दे शंभुमुमापतिं सुरगुरुं
वन्दे जगत्कारणं
वन्दे पन्नगभूषणं मृगधरं
वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशांक वह्निनयनं
वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयं च वरदं
वन्दे शिवं शंकरम् ॥

Center for Shaiva Studies, Pondicherry Collection
CC-0. Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

॥ स्तोत्रम् ॥

ॐ स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ।
सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः ॥ 1

जटी चर्मी शिखण्डी च सर्वांगः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ 2

प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ॥ 3

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषः प्रच्छन्नः सर्वलोकप्रजापतिः ॥ 4

महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ॥ 5

लोकपालोऽन्तर्हितात्मा प्रसादो नीललोहितः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥ 6

सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः ॥ 7

Center for Shaiva Studies, Pondicherry Collection
CC-0. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
आदिरन्तो लयः कर्ता मृगबाणार्पणोऽनघः ॥ 8

महातपा घोरतपा अदीनो दीनसाधकः ।
संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ 9

योगी योज्यो महाबीजो महारेता महाबलः ।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥ 10

दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः ।
विश्वरूपः स्वयंश्रेष्ठो बलवीरो बलो गणः ॥ 11

Center for Shaiva Studies, Pondicherry Collection
CC-0. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

गणकर्ता गणपतिः दिग्वासाः काम एव च ।
मन्त्रवित्परमो मन्त्रः सर्वभावकरो हरः ॥ 12

कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।
अशनी शतघ्नी खड्गी पट्टसी सायुधी महान् ॥ 13

सुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः ।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ॥ 14

दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च ।
सृगालरूपः सिद्धार्थो मुण्डः सर्वशुभंकरः ॥ 15

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

अजश्च बहुरूपश्च गङ्गाधारी कपर्द्यपि ।
ऊर्ध्वरेता ऊर्ध्वलिंग ऊर्ध्वशायी नभःस्थलः ॥ 16

त्रिजटः चीरवासाश्च रुद्रः सेनापतिर्विभुः ।
नक्तंचरोऽहश्चरश्च तिग्ममन्युः सुवर्चसः ॥ 17

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च व्याघ्रचर्माम्बरावृतः ॥ 18

कालयोगी महानाथः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतराजो भूतचारी महेश्वरः ॥ 19

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥ 20

महाघोरतपः शूरो नित्योऽनीहो निरालयः ।
सहस्रहस्तो विजयो व्यवसायो ह्यतन्द्रितः ॥ 21

अमर्षणोऽमर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥ 22

तेजोपहारी बलहा मुदितोऽजितो वरः ।
गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः ॥ 23

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ 24

विष्वक्सेनो हरिर्यज्ञः संयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ॥ 25

विष्णुप्रसादितो यज्ञः समुद्रो बडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ 26

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥ 27

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

शिखी मुण्डी जटी ज्वाली मूर्तिजो मूर्धगो बली ।
वैष्णवः प्रजवी ताली खेली कालकटंकटः ।। 28

नक्षत्रविग्रहमति-र्गुणबुद्धि-र्लयोऽगमः ।
प्रजापति-र्विश्वबाहु-र्विभागः सर्वतोमुखः ।। 29

विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेघजो बलचारी च महीचारी स्तुतस्तथा ।। 30

सर्वसूर्य-विनोदी च सर्ववाद्यपरिग्रहः ।
व्यालरूपो गुहावासी ग्रहमाली तरंगवित् ।। 31

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

त्रिदशः कालदृक् कर्म सर्वबन्धविमोचनः ।
बन्धनस्त्वसुरेन्द्राणां युधि शत्रुविनाशनः ॥ 32

सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो ह्यतुल्यो यज्ञभागवित् ॥ 33

सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरो यज्ञः सर्वधारी धरोत्तमः ॥ 34

लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः ।
संग्रहो निग्रहः कर्ता सर्वचीरनिवासनः ॥ 35

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपभृत् ॥ 36

सर्वकामप्रदश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपातो ह्यवशः खगः ॥ 37

रौद्ररूपोंऽशुरादित्यो बहुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ 38

सर्ववासी श्रियावासी उपदेशकरो ऽकरः ।
मुनिरात्मा निरालोकः संमग्नश्च सहस्रदः ॥ 39

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

पक्षी च प्लक्षरूपश्च अतिदीप्तो विशाम्पतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः ॥ 40

वामदेवश्च वामश्च प्राग्दक्षिणः उदङ्मुखः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः ॥ 41

भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिभागो गवांपतिः ॥ 42

वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तवृत्तकरस्तालो मधुर्मधुकलोचनः ॥ 43

Center for Shaiva Studies, Pondicherry Collection
CC-0. Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

वाचस्पत्यो वाजसनो नित्यमाश्रितपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित् ॥ 44

ईशान ईश्वरः कालो निशाचारी पिनाकभृत् ।
निमित्तस्थो निमित्तं च नन्दिर्नन्दिकरो हरिः ॥ 45

नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्धनः ।
भगहारी निहन्ता च कालो ब्रह्मा पितामहः ॥ 46

चतुर्मुखो महालिंगः चारुलिंगस्तथैव च ।
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ॥ 47

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ।
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः ॥ 48

दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ।
लोककर्ता पशुपतिर्महाकर्ता ह्यनौषधः ॥ 49

अक्षरं परमं ब्रह्म बलवान् शक्त एव च ।
नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः ॥ 50

बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान् समरमर्दनः ॥ 51

Center for Shaiva Studies, Pondicherry Collection
CC-0. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो ह्यतिधूम्रो हुतो हविः ॥ 52

वृषभः शंकरो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथांगलुब्धश्च शोभनो निरवग्रहः ॥ 53

खस्तिदः खस्तिभागश्च भागी भागकरो लघुः ।
उत्संगश्च महांगश्च महागर्भपरायणः ॥ 54

कृष्णवर्णः सुवर्णश्च इन्द्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः ॥ 55

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥ 56

महानासो महाकम्बु-र्महाग्रीवः श्मशानभाक् ।
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥ 57

लम्बनो लम्बितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः ॥ 58

महानखो महारोमा महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥ 59

Center for Shaiva Studies, Pondicherry Collection
CC-0. Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकरो वृक्षकेतुरनलो वायुवाहनः ॥ 60

गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ॥ 61

यजुः पादभुजो गुह्यः प्रकाशो जंगमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ॥ 62

उपकारः प्रियः सर्वः कनकः कांचनच्छविः ।
नाभिर्नन्दकरो भावः पुष्करस्थपतिः स्थिरः ॥ 63

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

द्वादशास्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ॥ 64

सगणो गणकारश्च भूतवाहनसारथिः ।
भस्माशायो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥ 65

लोकपालस्तथा लोको महात्मा सर्वपूजितः ।
शुक्लस्त्रिशुक्लः संपन्नः शुचिः भूतनिषेवितः ॥ 66

आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।
विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः ॥ 67

Center for Shaiva Studies, Pondicherry Collection
CC-0. Digitization by Agam Nigam. Funding Tattva Heritage Found

कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः ।
गन्धर्वो ह्यदितिस्ताक्ष्यः सुविज्ञेयः सुशारदः ॥ 68

परश्वथायुधो देवो ह्यनुकारी सुबान्धवः ।
तुम्बवीणो महाक्रोधो ऊर्ध्वरिता जलेशयः ॥ 69

उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः ।
सर्वांगरूपो मायावी सुहृदो ह्यनिलो नलः ॥ 70

बन्धनो बन्धकर्ता च सुबन्धनविमोचनः ।
स यज्ञारिः स कामारि-र्महादंष्ट्रो महायुधः ॥ 71

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

बहुधाऽ निन्दितः सर्वः शंकर-श्चन्द्रशेखरः ।
अमरेशो महादेवो विश्वदेवः सुरारिहा ॥ 72

अहिर्बुध्न्यो ऽनिलाभश्च चेकितानो हरिस्तथा ।
अजैकपाञ्च कापाली त्रिशंकुरजितः शिवः ॥ 73

धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ।
धाता शक्रश्च विष्णुश्च मित्र-स्त्वष्टा ध्रुवो धरः ॥ 74

प्रभावः सर्वगो वायु-र्यमा सविता रविः ।
उषंगुश्च विधाता च मांधाता भूतभावनः ॥ 75

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

विभु-र्वर्णविभावी च सर्वकामगुणावहः ।
पद्मनाभो महागर्भ-श्चन्द्रवक्त्रोऽनिलोऽनलः ॥ 76

बलवांश्चोपशान्तश्च पुराणः पुण्यचंचुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥ 77

सर्वाशयो दर्भचारी सर्वेषां प्राणिनांपतिः ।
देवदेवः सुखासक्तः सदसत् सर्वरत्नवित् ॥ 78

कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ 79

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

वणिजो वर्धकी वृक्षो बकुल-श्चन्दनच्छदः ।
सारग्रीवो महाजत्रु-रलोलश्च महौषधः ॥ 80

सिद्धार्थकारी सिद्धार्थ-श्छन्दो-व्याकरणोत्तरः ।
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ 81

प्रभावात्मा जगत्कालः कालो लोकहितस्तरुः ।
सारंगो नवचक्रांगः केतुमाली सभावनः ॥ 82

भूतालयो भूतपति-रहोरात्र-मनिन्दितः ॥ 83

Center for Shaiva Studies, Pondicherry Collection
CC-0. Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

वर्धितस्सर्वभूतानां निलयश्च विभुर्भवः ।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः ॥ 84

धृतिमान् मतिमान् दक्षः सत्कृतश्च युगाधिपः ।
गोपालो गोपति-र्ग्रामो गोचर्मवसनो हरिः ॥ 85

हिरण्यबाहुश्च तथा गुहापालः प्रवेशकः ।
प्रकृष्टारि-र्महाहर्षो जितकामो जितेन्द्रियः ॥ 86

गान्धारश्च सुवासश्च तपःसक्तो रति-र्नरः ।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः ॥ 87

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

महाकेतु-र्महाधातु-र्नैकसानुचर-श्चलः ।
आवेदनीय आवेशः सर्वगन्धसुखावहः ॥ 88

तोरणस्तारणो वातः परिधी पतिखेचरः ।
संयोगो वर्धनो वृद्धो ह्यतिवृद्धो गुणाधिकः ॥ 89

नित्य आत्मा सहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च देवो दिवि सुपर्वणः ॥ 90

आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥ 91

Center for Shaiva Studies, Pondicherry Collection
CC-0. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥ 92

समाम्नायोऽसमाम्नाय-स्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥ 93

रत्नप्रभूतो रक्तांगो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्त-स्तपोनिधिः ॥ 94

आरोहणोऽधिरोहश्च शीलधारी महायशाः ।
सेनाकल्पो महाकल्पो योगो युगकरो हरिः ॥ 95

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

युगरूपो महारूपो महानागहनो वधः ।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः ॥ 96

बहुमालो महामालः शशी हरिसुलोचनः ।
विस्तारो लवणः कूप-स्त्रियुगः सफलोदयः ॥ 97

त्रिलोचनो विषण्णांगो मणिविद्धो जटाधरः ।
बिन्दु-र्विसर्गः सुमुखः शरः सर्वायुधः सहः ॥ 98

निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम् ॥ 99

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

मन्थानो बहुलो वायुः सकलः सर्वलोचनः ।
तलस्तालः करस्थाली ऊर्ध्वसंहननो महान् ॥ 100

छत्रं सुछत्रो विख्यातो लोकः सर्वाश्रयः क्रमः ।
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः ॥ 101

हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥ 102

सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिंगलः ॥ 103

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ 104

गंभस्ति-ब्रह्मकृद् ब्रह्म ब्रह्मविद् ब्राह्मणो गतिः ।
अनन्तरूपश्चैकात्मा तिग्मतेजाः स्वयंभुवः ॥ 105

ऊर्ध्वगात्मा पशुपति-र्वातरंहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥ 106

कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत् ।
उमापतिरुमाकान्तो जाह्नवीभृदुमाधवः ॥ 107

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

वरो वरार्हो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिंगलः ॥ 108

प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ॥ 109

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः ।
साध्यर्षि-र्वसु-रादित्यो विवस्वान् सविता ऽमृतः ॥ 110

व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः ।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः ॥ 111

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

कलाःकाष्ठा लवा मात्रा मुहूर्ताहः क्षपाः क्षणाः ।
विश्वक्षेत्रं प्रजाबीजं लिंगमाद्यस्सु निर्गमः ॥ 112

सदसद्व्यक्त-मव्यक्तं पिता माता पितामहः ।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ 113

निर्वाणं ह्लादनं चैव ब्रह्मलोकः परागतिः ।
देवासुरविनिर्माता देवासुरपरायणः ॥ 114

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुर-महामात्रो देवासुर-गणाश्रयः ॥ 115

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवादिदेवो देवर्षि-र्देवासुरवरप्रदः ॥ 116

देवासुरेश्वरो विश्वो देवासुरमहेश्वरः ।
सर्वदेवमयो ऽचिन्त्यो देवतात्मा ऽऽत्मसम्भवः ॥ 117

उद्भित्-त्रिविक्रमो वैद्यो विरजो नीरजो ऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ॥ 118

विबुधोऽग्रवरः सूक्ष्मः सर्वदेव-स्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवो ऽव्ययः ॥ 119

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation

गुहः कान्तो निजः सर्गः पवित्रं सर्वपावनः ।
शृंगी शृंगप्रियो बभ्रू राजराजो निरामयः ॥ 120

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ॥ 121

स्थावराणांपतिश्चैव नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽचिन्त्यः सत्यव्रतः शुचिः ॥ 122

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

व्रताधिपः परंब्रह्म भक्तानां परमागतिः ।
विमुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्धनो जगत् ॥ 123

यः पठेत शुचि स्सार्थं ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेथफलं लभेत् ॥

ॐ शिवार्पणमस्तु

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

।। शिव मानस पूजाः ।।

रत्नैः कल्पित-मासनं हिमजलैः स्नानं च दिव्यांबरं
नानारत्न-विभूषितं मृगमदामोदांकितं चन्दनम् ।
जाती-चंपक विल्वपत्र रचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ।।

Center for Shaiva Studies, Pondicherry Collection
CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्ष्यं पंचविधं पयोदधियुतं रंभाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरकण्डोज्ज्वलं
तांबूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणा-भेरि-मृदंग-काहलकला-गीतं च नृत्यं तथा ।
साष्टांग प्रणतिः स्तुति-र्बहुविधा ह्येतत् समस्तं मया
संकल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विदित-मविदितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

ISBN 81-7120-249-7

God and Divine Incarnations
Sri Krishna, Pastoral and King maker
The Message of Eternal Wisdom
For Thinkers on Education
Book of Daily Thoughts and Prayers
Path of Devotion
The Way of Peace and Blessedness

Sri Siva Sahasranama Stotram (Sanskrit) Re.1.00

CC-0. In Public Domain. Digitization by Agam Nigam Funding Tattva Heritage Foundation
Center for Shaiva Studies, Pondicherry Collection